निरशनं, क्ली, (निर्+अश+ल्युट्।) भोजनाभावः। अनशनम्। (निर्गतं अशनं भोजनादिकं यस्मात्। भोजनरहिते, त्रि॥)

निरसः, त्रि, (निर्गतो रसो यस्मात्।) नीरसः। पुं, रसाभावः। रसस्य अभावः इति तत्पुरुषसमासनिष्पन्नः॥

निरसनं, क्ली, (निरस्यते क्षिप्यते इति। निर्+अस+ल्युट्।) प्रत्याख्यानम्। इत्यमरः।३।२।३१॥ (यथा, महाभारते।१४।४।१०।
"स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनञ्च तत्।
नियतो वर्त्तयामास प्रजाहितचिकीर्षया॥")
वधः। निष्ठीवनम्। इति मेदिनी। ने, १६१॥

निरसा, स्त्री, (निर्गतो रसो यस्याः।) निःश्रेणिकातृणम्। इति राजनिर्घण्टः॥

निरस्तः, त्रि, (निर्+अस्+क्तः।) प्रहितबाणः। त्यक्तशरः। त्वरितोदितम्। शीघ्रोच्चारितवचः। निराकरणविशिष्टः। तत्पर्य्यायः। प्रत्यादिष्टः २ प्रत्याख्यातः ३ निराकृतः ४ निकृतः ५ विप्रकृतः ६। इत्यमरः।३।१।४०॥ प्रतिक्षिप्तम् ७ अपविद्धम् ८। इति हेमचन्द्रः॥ निष्ठ्यूतः। प्रेषितः। संत्यक्तः। प्रतिहतः। इति मेदिनी। ते, ११७॥ (यथा, हितोपदेशे। १।४८।
"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"
यथाच मार्कण्डेयपुराणे। ८६। २३।
"आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया॥")

निराकरणं, क्ली, (निर्+आ+कृ+ल्युट्।) निवारणम्। निरसनम्। इति निराकरिष्णुशब्दटीकायां भरतः॥

निराकरिष्णुः, त्रि, (निराकरोति तच्छीलः। निर्+आ+कृ+"अलंकृञ्निराकृञिति।"३।२।१३६। इति इष्णुच्।) निराकरणशीलः। तत्पर्य्यायः। क्षिप्नुः २। इत्यमरः।३।१।३०॥ (यथा, भट्टिकाव्ये।५।१।
"निराकरिष्णुर्वर्त्तिष्णुर्वर्द्धिष्णुः परितो रणम्॥")

निराकारः, पुं, (निर्गत आकारो देहादिरूपस्वरूपं यस्मादिति। निरादय इति समासः।) परमेश्वरः। ब्रह्म। यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्व्वाधारञ्च सर्व्वञ्च स्वेच्छारूपं नमाम्यहम्॥"
अपि च।
"तेजःस्वरूपो भगवान् निराकारो निराश्रयः।
निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः॥
ध्यायन्ति योगिनस्तेजस्तदीयमशरीरिणम्।
वैष्णवास्तेव साकारं कमनीयं मनोहरम्॥
केचिच्चतुर्भुजं शान्तं लक्ष्मीकान्तं मनोहरम्।
शङ्खचक्रगदापद्मधरं पीताम्बरं परम्॥
द्विभुजं कमनीयञ्च किशोरं श्यामसुन्दरम्।
शान्तं गोपाङ्गनाकान्तं रत्नभूषणभूषितम्॥
एवं तेजस्विनं भक्त्या सेवन्ते सततं मुदा।
ध्यायन्ति योगिनो यत्तु कुतस्तेजस्विनं विना॥"
अपि च।
"यो निर्गुणः स निर्लिप्तः प्रकृतिभ्यो नहि संयुतः।
सिद्धस्वराश्रितः प्रकृतौ निर्गुणः सगुणो भवेत्॥
यावन्ति च शरीराणि भोगार्हाणि महामुने!।
प्राकृतानि च सर्व्वाणि श्रीकृष्णविग्रहं विना॥
ध्यायन्ति योगिनस्तञ्च शुद्धं ज्योतिःस्वरूपिणम्।
हस्तपादादिरहितं निर्गुणं प्रकृतेः परम्॥
वैष्णवास्तं न मन्यन्ते तद्भक्ताः सूक्ष्मदर्शिनः।
कुतो बभूव तज्ज्योतिरहो तेजस्विनं विना॥
ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्।
अतीवामल्यसद्रत्नभूषणेन विभूषितम्॥
एवं भक्ताश्च ध्यायन्ति श्रमचरणसेविनः।
योगिनो योगरूपञ्च काले भक्तिविपाकतः॥
ज्योतिरभ्यन्तरे मूर्त्तिं पश्यन्ति कृपया प्रभोः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे।३२।७।४२ अः॥
तस्य द्विचत्वारिंशन्नामानि यथा,—
"जगद्योनिरयोनिस्त्वमनन्तोऽव्यय एव च।
ज्योतिःस्वरूपी ह्यनघः सगुणो निर्गुणो महान्॥
भक्तानुरोधात् साकारो निराकारो निरङ्कुशः।
निर्व्यूहो निखिलाधारो निःशङ्को निरुपद्रवः॥
निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः।
स्वात्मारामः पूर्णकामोऽनिमेषो नित्य एव च॥
सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः।
वेदहेतुश्च वेदाश्च वेदाङ्गो वेदविद्विभुः॥
द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत्।
दृढां भक्तिं हरेर्दास्यं लभते वाञ्छितञ्च यत्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥
आकारशून्ये, त्रि॥

निराकृतः, त्रि, (निर्+आ+कृ+क्तः।) प्रत्याख्यातः। निरस्तः। इत्यमरः। ३। १। ४०॥

निराकृतिः, स्त्री, (निर्+आ+कृ+क्तिन्।) निरसनम्। निराकरणम्। इत्यमरः।२।२।३१॥ (निर्गता आकृतिर्यस्मादिति।) अनाकारे अस्वाध्याये च त्रि। इति मेदिनी। ते, २०३॥ (पुं, पञ्चमहायज्ञानुष्ठानरहितः। यथा, मनुः। ३। १५४।
"वृत्ती च पशुपालश्च परिवेत्ता निराकृतिः॥"
"निराकृतिः पञ्चमहायज्ञानुष्ठानरहितः।
तथा च छन्दोगपरिशिष्टम्।
निराकर्त्तामरादीनां स विज्ञेयो निराकृतिः॥"
इति कुल्लूकभट्टः॥
"निराकृतिः सत्यधिकारे महायज्ञानुष्ठानरहितः। अनन्ये निराकृतिरुच्यते। एवं हि शतपथे। यो न देवानर्चति न पितॄन् न मनुष्यानिति। यैस्तु पठति अस्वाध्यायश्रुतधनैर्निराकृतिरदाहृतः।" इति मेधातिथिः॥ *॥ रोहितमनुपुत्त्रः। यथा, हरिवंशे। ७। ६३।
"दक्षपुत्त्रस्य पुत्त्रास्ते रोहितस्य प्रजापतेः।
मनोः पुत्त्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः॥")

निराचारः, त्रि, निर्न विद्यते आचारो यस्य सः। अनाचारः। आचारशून्यः॥

निरातपा, स्त्री, (निर्गत आतपो यस्याः।) रात्रिः। इति शब्दचन्द्रिका॥ आतपशून्ये, त्रि॥

निराबाधः, त्रि, (निर्गता आबाधा प्रतिबन्धो यस्मात्।) पक्षाभासविशेषः। यथा,—
"अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम्।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्ज्जयेत्॥
निराबाधं अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहरति।" इति मिताक्षरा॥

निरामयः, त्रि, (निर्गत आमयो व्याधिर्यस्मात्।) रोगरहितः। तत्पर्य्यायः। वार्त्तः २ कल्यः ३। इत्यमरः। २। ६। ५७॥ नीरुजः ४ पटुः ५ उल्लाघः ६ लघुः ७ अगदः ८ निरातङ्कः ९। अनातङ्कोऽपि पाठः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ३६।
"निरामयाणां चित्रञ्च भक्तमध्ये प्रकीर्त्तितम्॥"
उपद्रवादिशून्यः। यथा, महाभारते। १। १५७। ११।
"इदं नगरमभ्यासे रमणीयं निरामयम्।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः॥"
रोगनाशकः। यथा, मुकुन्दमालायाम्। २१।
"किमौषधैः क्लिश्यसि मूढ़ दुर्म्मते!
निरामयं कृष्णरसायनं पिब॥")

निरामयः, पुं, (निर्गतः आमयो यस्मात्।) इड्डिकः। वनच्छगलः। इति मेदिनी। ये, १२१॥ शूकरः। इति शब्दमाला॥ (नृपविशेषः। यथा, महाभारते। १। १। २३४।
"धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः॥"
महादेवः। इति महाभारतम्।१३।१७।१४८॥
क्ली, कुशलम्। यथा, तत्रैव। ५। ७८। ८।
"कुरूणां पाण्डवानाञ्च प्रतिपत्तस्व निरामयम्॥")

निरामालुः, पुं, (नितरां रमतेऽनेनेति। नि+रम+बाहुलकात् आलु दीर्घश्च।) कपित्थः। इति शब्दचन्द्रिका॥ (विवरणमस्य कपित्थशब्दे ज्ञातव्यम्॥)

निरालम्बा, स्त्री, (निर्नास्ति आलम्बो यस्याः।) आकाशमांसी। इति राजनिर्घण्टः॥ (शुक्लयजुर्वेदान्तर्गतोपनिषद्विशेषः। इति मुक्तिकोपनिषत्॥ अवलम्बनशून्ये, त्रि। यथा, हठयोगप्रदीपिकायाम्। ३। ५४।
"एको देवो निरालम्ब एकावस्था मनोन्मनी॥")

निराशः, त्रि, (निर्गता आशा यस्मादिति।) आशाशून्यः। यथा, तिथितत्त्वे।
"भूताहे ये प्रकुर्व्वन्ति उल्काग्रहणमग्रेतनः।
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥"

निरासनं, क्ली, (निर्+आस+ल्युट्।) निरसनम्। (निर्गतं आसनं यस्मात्।) आसनाभावविशिष्टे, त्रि॥

निराहारः, त्रि, (निर्गत आहारो यस्य।) आहाररहितः। यथा,—
"निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये।"
इति तर्पणप्रकरणीयाह्निकाचारधृतवचनम्॥